श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री घटिकाशत वात्स्यवरदार्यमहादेशिकैरनुगृहीतं

# ॥ श्री वात्स्यवरददेशिकसुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वात्स्यवरददेशिकसुप्रभातम् ॥

नमो वरदविष्ण्वार्यनयनानन्ददायिने।
वात्स्याय वरदार्याय वादिनीहारभास्वते ॥

श्रीवत्सवंशकलशोदधिपूर्णचन्द्र !
श्रीकान्तपादसरसीरुहमत्तभृङ्ग !।
श्रीविष्णुचित्तगुरुवर्यकटाक्षलब्ध -
श्रीभाष्य ! ते वरददेशिक ! सुप्रभातम् ॥ 1 ॥

भास्वानुदेति बहिरन्धतमोऽपहर्तुं
अन्तस्तमश्शमयितुं निपुणो भवान्नः।
उत्तिष्ठ रम्यशयनात् करुणापयोधे !
लोकार्य ! ते वरददेशिक ! सुप्रभातम् ॥ 2 ॥

गायन्ति वैष्णवगणा हरिभक्तियुक्ताः
काञ्चीपुरे वरदराजगुणाननेकान्।
श्रोतुं क्षमोऽद्य समयो भवति प्रपन्न -
कूटस्थ ! ते वरददेशिक ! सुप्रभातम् ॥ 3 ॥

त्वत्सन्निधेः धुरि यतीश्वरभाष्यटीकां
आदाय तिष्ठति सुदर्शनभट्टसूरिः।
रामानुजोऽपि च तदर्थविवेचनाय
भक्त्यैव ते वरददेशिक ! सुप्रभातम् ॥ 4 ॥

श्रीभाष्यरक्षणकृते पुनरेव जातः
श्रीभाष्यकार इति यं प्रवदन्ति सन्तः।
त्रय्यन्तसूरिरपि तिष्ठति शिष्यवर्गैः
द्वारे स ते वरददेशिक ! सुप्रभातम्॥ 5॥

श्रीमत्यनन्तसरसि प्रतिपालयन्ति
स्नातुं गताः कमललोचनदासवर्याः।
त्वत्पूतदिव्यचरणामलतीर्थसेवा -
हेतोस्तु ते वरददेशिक ! सुप्रभातम्॥ 6॥

रामानुजाय नम इत्यमलाशयेन
यूयं वदध्वमिति शिष्यगणानवोचत्।
यो मन्त्रराजचरणत्रयसारवेत्ता
सर्वज्ञ ते वरददेशिक ! सुप्रभातम्॥ 7॥

क्षीरप्रदानसमये जननी ममेति
प्रीतीयुतो वरदराडुदगूहयत् यम्।
यस्य क्षितौ भवति विश्रुतमाह्वयं तत्
अंबेति ते वरददेशिक ! सुप्रभातम्॥ 8॥

श्रीमत्प्रपन्नजनवाञ्छितपारिजात -
नामप्रबन्धमनघं प्रबबन्ध वाचा।
यो वै परत्वमुखपञ्चकमर्चिरादि -
मार्गं च ते वरददेशिक ! सुप्रभातम्॥ 9॥

श्रीभाष्यमण्टपवरे तु मिथः प्रभाते
सत्पञ्जरावसतयः शुकसारिकाश्च।
त्रय्यन्तवेद्यपरजीवविवादभेदं
कुर्वन्ति ते वरददेशिक ! सुप्रभातम्॥ 10॥

श्रीवेगवत्यमलसैकततल्पवर्ये
सुप्तः प्रबुध्यति पतत्रिरवैः मृगेन्द्रः।
हंसावली च मृदु कूजति कर्णरम्यं
उत्तिष्ठ ते वरददेशिक ! सुप्रभातम्॥ **11** ॥

सच्छिष्यवर्गनिकरस्तव पादयुग्म -
सेवार्थमद्य यतते बहिरात्तहर्षः।
किंचिद्विलोकय कृपाशिशिरैरपाङ्ग -
लेशैस्तु ते वरददेशिक ! सुप्रभातम्॥ **12** ॥

तस्य प्रसीदति हरिः भगवान् शठारि -
रामानुजप्रभृतयो गुरवश्च नित्यम्।
उत्थाय यः पठति भक्तियुतः प्रभाते
मुक्तिप्रदं वरददेशिकसुप्रभातम्॥ **13** ॥

॥ इति श्री वात्स्यवरददेशिकसुप्रभातं समाप्तम्॥